# श्रीरामानुजदर्शने चैतन्यम्

प्रो. अरेय्यर्. श्रीराम शर्मा

'परमवैदिकसिद्धान्तः' इति प्राक् प्रसिद्धं विशिष्टाद्वैतदर्शनं तु ततः रामानुजदर्शनम् इति लोके व्यवहृतम् । वेदान्तसिद्धान्तेषु द्वैतं आनन्दतीर्थाचार्यस्य, अद्वैतं तु शंकराचार्यस्य, विशिष्टाद्वैतं तु रामानुजाचार्यस्य महिम्ना लोके प्रचारं प्राप्तम् ॥

तत्र चेतनवर्गैः अचेतनवर्गैश्च विशिष्टं परंब्रह्म एकमेव तत्वं इति विशिष्टाद्वैतार्थः। चैतन्यवान् चेतनः । चैतन्यरहितः अचेतनः । चैतन्यं कदापि निराश्रयं न भवति ।

तत्र च चेतनवर्गेषु सामान्यस्य चेतनतत्त्वस्य स्वरूपादिकं इदानीं आकरग्रंथानुसारेण निरुप्यते। आश्रयं विना आश्रयिणः स्वतंत्रतया निरूपयितुं अशक्यत्वात् । आत्मा चेतनः ईश्वरस्तु परमःचेतनः । तत्र

देहेन्द्रियमनः प्राणधीभ्योऽन्योऽनन्यसाधनः ।
नित्योव्यापी प्रतिक्षेत्रं आत्मा भिन्नः स्वतस्सुखी ॥

इति भगवद्यामुनमुनेः आत्मवादसंग्रहश्लोकः ।

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः

इति भगवद्गीतोत्त्कदिशा देहादिभ्योऽन्यः ज्ञानी क्षेत्रज्ञः जीवात्मा चेतनः इति तु स्पष्टमेव। व्यापी सूक्ष्मत्वात् सर्वत्र प्रवेष्टुं शीलमस्येति अणुरित्यर्थः । अनन्यसाधनः स्वयं प्रकाशः ज्ञानस्वरूपः ज्ञानगुणकः ज्ञानपरिणमरुप आनन्दगुणकश्च इत्यर्थः।

क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।

इति गीतोक्तदिशा अक्षरः इत्यपि जीवात्मा व्यवह्रियते ।

यस्मात् क्षरमतीतोऽहं अक्षरादपिचोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

इति गीतोक्तदिशा परब्रह्मतत्वात् चेतनः भिन्नः अवरश्च । तदुक्तम् : -

अपरेयमितस्त्वन्यां प्रकृतिं विद्धिमे पराम् ।
जीवभूतां महाबाहो ! ययेदं धार्यते जगत् ॥

इति ।

अत्र शरीरादिरूपेण परिणतायाः अपरायाः प्रकृतेः धारकतया चेतनः आत्मा इत्युच्यते। अत एव च परा भगवतः प्रकृतिः चेतनः इति ॥

पुरुषः इति चेतनः जीवात्मा उच्यते परमपुरुषः इति पुरुषोत्तमः इतिच परमात्मा जीवात्मभिन्नतया उच्यते यथा : -

उत्तमः पुरुषत्स्वन्यः परमात्मेत्युदाहृतः

इति भगवद्गीतावचनम् ।

एवं परमात्मनः परतन्त्रः एव जीवात्मा चेतनः परमात्मनः शरीरं इति परमवैदिकसिद्धान्तः यथा बृहदारण्यके : -

"यस्यात्माशरीरं; य आत्मानमन्तरो यमयति; सत आत्मा अन्तर्याम्यमृतः" इति परमात्मनः जीवात्मान्तर्यामित्वं निरूपितम् :

अथ तत्वत्रयग्रन्थानुसारेण जीवात्म स्वरूपादिकं संगृह्यते । : -

आत्मा देहेन्द्रियमनः प्राणबुद्धिपदार्थेभ्यो विलक्षणत्वात् भिन्नः, अजडः, आनन्दरूपः, नित्यः, अणुपरिमाणः अव्यक्तः, अचिन्त्यः, अवयवैः आनारब्धत्वात् निरवयवः, निर्विकारः, ज्ञानाश्रयः, सर्वेश्वरस्य परमात्मनः श्रीमते नारायणस्य नियाम्यः धार्यः शेषश्च ॥

अयं मम देहः, इमानि मम इन्द्रियाणि, इदं मम मनः, अयं मम प्राणः, इयं मम बुद्धिः इति इदमादिशब्दबोध्येभ्यः देहादिभ्यः अहमित्येव सर्वदा बोध्यः जीवात्मा चेतनः भिन्नः । अयं मम अयंतव अयं तस्य इति व्यवहारात् प्रतिशरीरं एकैकः चेतनः वर्तते इति अन्यचेतनेभ्यः स्वस्य भिन्नत्वात् चेतनानां एवमेव नानात्वं सिद्धम् ।

यद्यपि उक्तानां तर्कयुक्तीनां कदाचित् प्रबलयुकत्यन्तर प्रतिहतेः अनुमानात्, एवं रीत्या देहादिविलक्षणत्वं श्रुतिस्मृतिसूत्रपुराणागमदिशा सप्रमाणादेव वेदान्तिभिः अङ्गीकर्तव्यः। अत एवं तर्काप्रतिष्ठानात् इति भगवता व्यासेन सूत्रितम्। एवं अग्रेऽपि शास्त्रप्रमाणादेव सर्वसिद्धिः वक्तव्या ।

यथा : -

"भोक्ता भोग्यं प्रेरितारं च मत्वा" "पृथगात्मानं प्रेरितार च मत्वा, जुष्टस्ततस्तेनामृतत्वमेति"

"क्षरं प्रधानं, अमृताक्षरं हरः, क्षरात्मानावीशतेदेव एकः"

"प्रधानक्षेत्रज्ञपतिर्गुणेशः" इति श्वेताश्वतरोपनिषदि तत्वत्रयभेदः मोक्षार्थज्ञान विषयतया निरूपितः ।

प्रकृतितत्वं चतुर्विंशति भेद भिन्न वेदान्तिभिः उपनिषत्प्रमाणानुसारेण अङ्गीक्रियते । तथाचः-

पञ्चविंशोयं पुरुषः, पञ्चविंश आत्मा भवति, इति उपनिषत्सु ।

भूतानि च कवर्गेण, चवर्गेणेन्द्रियाणि च ।

टवर्गेण, तवर्गेण ज्ञानगन्धादयस्तथा ॥

मनः पकारेणैवोकत, फकारेणत्वहंकृतिः ।

बकारेण - भकारेण महान् - प्रकृतिरुच्यते ॥

आत्मा तु स मकारेण पञ्चविंशः प्रकीर्तितः । इति । पाद्मोत्तर पुराणे २२६ अध्याये

यः परः प्रकृतेः प्रोक्तः पुरुषः पञ्चविंशकः ।

स एव सर्वभूतात्मा नर इत्यभिधीयते ॥ इति महाभारते आरण्य पर्वणि १७५ अध्याये ।

आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ।

प्रवृध्द्युपचयौ न स्तः एकस्याखिलजन्तुषु ॥ इति ॥

विष्णुपुराणे द्वितीयांशे त्रयोदशाध्याये। तथा तत्रैव : -

पिण्डः पृथग्यतः पुंसः शिरःपाण्यादिलक्षणः ।
ततोऽहमिति कुत्रैतां संज्ञां राजन् । करोम्यहम् ॥
किंत्वमेतच्छिरः, किन्नु शिरस्तव, तथोदरम् ।
किमु पादादिकं त्वं वै, तवैतत्किं महीपते ! ।
समस्तावयवेभ्यस्त्वं पृथग्भूतव्यवस्थितः ।
कोऽहमित्येव निपुणो भूत्वा चिन्तय पार्थिव !
पञ्चभूतात्मके देहे देही मोहतमोवृतः ।
अहं ममैतदित्युच्चैः कुरुते कुमतिर्मतिम् ॥
आकाशवाय्वग्निजलपृथिवीभ्यः पृथक्स्थिते ।
आत्मन्यात्ममयं भावं कः करोति कळेबरे ॥ इति ।

एवं शास्त्रप्रमाणसिद्धं दुर्ज्ञेयम्, अनुमानादि प्रमाणसिद्धंकदाचित् सापन्हतम् इति आत्मनः देहदेहि लक्षणत्वं सिद्धम् ।

आत्मपदार्थस्य देहादि वैलक्षण्ये तु मुख्यो निमित्तं चैतन्यमेव । उक्तंच संग्टह्य नैय्यायिकैः -

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ।
तथात्वं चेदिन्द्रियाणां उत्पद्यते कथं स्मृतिः ॥
मनोऽपि न तथा ज्ञानादि अनध्यक्षं तदा भवेत् ।
धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ।
प्रवृत्याद्यनुमेयोऽयं रथगत्येव सारथिः ।
अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः ॥
विभुर्बुध्यादि गुणवान् ॥ इति ॥

चेतनस्य धर्मः चैतन्यम् । चित=सञ्चेतने इत्यस्मात् चौरादिकात् चेतयते इति चेतनः इति पदं सिध्यति । चेतयिता जीवः चैतन्यकार्यसम्पादकः इति भावः ।

चिती=संज्ञाने इति भौवादिकात् धातोः चेततीति ज्ञानं एव चैतन्य पदार्थतया ज्ञायते ॥

चैतन्यमेव चेतनः इति क्षणिकविज्ञानात्मवादिनां बौद्धानां, नित्यविज्ञानात्मवदिनां अद्वैतवेदान्तिनां च पक्षः । चैतन्यं न आत्मा चैतन्याश्रयः आत्मा इति नैय्याकादीनां पक्षः । आत्मा तु चेतनः ज्ञानस्वरूपः ज्ञानगुणकश्च इति विशिष्टाद्वैतवेदान्तिनां पक्षः । एवं -

"विज्ञानघनः" "आत्मा ज्ञानमयः" "तच्च ज्ञानमयं व्यापि स्वसंवेद्यं अनूपमम्" "ज्ञानस्वरूपं अत्यन्तनिर्मलं परमार्थतः" इत्यादिभिः प्रमाणैः आत्मनः ज्ञानघनरूपवत्त्वं प्रसिद्धम् । एवं "ज्ञोत एव" "जानात्येवायं पुरुषः" "ब्रह्मविदाप्नोति परम्" "ब्रह्मवेद ब्रह्मेव भवति" इत्यादिभिः ज्ञातृत्वरूपं ज्ञानाश्रयत्वं च प्रसिद्धम् ॥

एवञ्च धर्मिभूतं ज्ञानं धर्मभूतज्ञानस्याश्रयतयातिष्ठतीति धर्मिभूतज्ञानस्य गुणः धर्मभूतज्ञानं चैतन्यं इति स्पष्टीकृतम् ।

यथा चेतनवर्गः जीवात्मसमूहः ज्ञानद्रव्यं तथा तद्धर्मभूतं ज्ञानमपि द्रव्यमेव। यथा - प्रभावत्पदार्थानां इव प्रभाया अपि द्रव्यत्वं इति विशिष्टाद्वैतसिद्धान्ते अङ्गीकृतम् ।

धर्मिभूतज्ञानं तु संकोचविकासयोः अयोग्यं, स्वव्यतिरिक्तार्थानां अप्रकाशकं, स्वस्मै स्वयं प्रकाशमानं, अणु च इति ज्ञेयम् । धर्मभूतंज्ञानं तु संकोचविकासयोः योग्यं, स्वव्यतिरिक्तार्थानां प्रकाशकं, स्वयंप्रकाशमानत्वेऽपि स्वस्मै अप्रकाशमानं, स्वाश्रयं प्रत्येव प्रकाशमानं, विभु च इति ज्ञेयम् ॥

केषांचित् ज्ञानं सर्वदा विभु; केषांचित्तु सर्वदा अविभु, केषांचित्तु कदाचित् विभु कदाचित् अविभु । एवं विभुत्वं आत्यन्तिकम् ।

इदं ज्ञानं नित्यमपि इन्द्रियद्वारा प्रसरणाप्रसराणाभ्यां उत्पत्तिं नाशं च व्यवहारे भजति ।

एकमेव ज्ञानं प्रसरणोपाधिभेदात् नानारूपं भवति । ज्ञानं चेतनस्य धर्मभूतमपि द्रव्यमेव गुणक्रियाश्रयत्वात् । अजडत्वाच्च अजडद्रव्यं अजडत्वंनाम स्वयं-

प्रकाशत्वम् । धर्मत्वंनाम विशेषणत्वम् । गुणत्वं च विशेषणत्वमेव । तथा च दण्डी कुण्डली वासस्वी देवदत्तः इत्यादिषु प्रयोगेषु दण्डस्य कुण्डलस्य वाससश्च द्रव्यत्वेपि देवदत्तद्रव्यं प्रति विशेषणत्वात् तद्धर्मत्वं तद्गुणत्वं च सिद्धम् । अत्रगुणत्वं नैय्यायिकादि परिगणित द्रव्यत्वासमानाधिकरण गुणत्वरुपजात्याश्रयत्वं इति न मन्तव्यम्; किन्तु गुणत्वं विशेषणत्वम् विशेष्योत्कर्ष निमित्तत्वं इति मन्तव्यम् ॥

ज्ञानस्य अजत्वात् स्वयंप्रकाशत्वे सुषुप्तिमूर्छादिषु कथं प्रतीतिः न इति प्रश्ने, प्रसरणाभावात् इति उत्तरम् । तमोगणाभिभूतत्वात् सुषुप्त्यादिषु ज्ञानस्य प्रसारणं नास्ति । तिरोहितमणिप्रकाशादिवत् ।

ज्ञानंतु स्वरूपतः स्वाश्रयस्यजीवात्मनः अनुकूलतया वेदनीयत्वात् सुखरूप-मेव । सुखमेवह्यानन्दः । एवं ज्ञानस्य परिणामविशेष एव आनन्दः इति भावः ज्ञानंयदा इदं मम ज्ञानं एवंप्रकारं इति जीवात्मनः, प्रकाशते तदा ज्ञानांशस्य अनुकूलत्वमेव । ज्ञाने यः विषयांशः संगतः स तु अनुकूले वा भवति प्रतिकूले वा भवति । जीवात्मनः पुण्यपापकर्मानुसारेण विषयाणां प्रतिकूलत्वादिकं नियतम्। ज्ञानस्य सुखमात्र-परिणामित्वात् । विसशक्तादीनां विषयाणां प्रतिकूलत्वं जीवकर्मायत्तम् । वस्तुतः सर्ववस्तुनः अनुकूल्यमेवस्वरूपम् ।

महर्षि मैत्रेयं पृच्छकं प्रतिवदता भगवता पराशरेण एतत् स्पष्टीकृतम् यथा विष्णुपुराणे।

वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च ।
कोपाय च यतस्तस्मात् वस्तु वस्त्वात्मकं विदुः
तदेव प्रीतिये भूत्वा पुनर्दुःखाय जायते ।
तस्माद् दुःखात्मकं नास्ति न च किंचित्सुरवात्मकम् ।

इति ।

विषशस्त्रादीनां प्रतिकूलत्ववत् चन्दन कुसुमादीनां अनुकूलत्वं देहात्मभ्रम-मूलकम् जीवकर्मानुगुणं भवति । शुद्धं ज्ञानं आत्मविषयकं परमात्म विषयकं च ज्ञानं

तथा सर्वविषय प्रकाशन दशायां सर्वमपि ज्ञानं आनन्दरूपमेव । तथा च इदं ममप्रतिकूलं वस्तु इदं ममानुकूलं वस्तु इति विवेकात्मकं ज्ञानं मम जातं खलु; अन्यथा अहं अविवेकात् दुःखभाक् अभविष्यम् इति विषयस्य प्रतिकूलत्वे समापतितेऽपि प्रतिकूलविषयज्ञानस्य जीवात्मानुकूलत्वात् अनुकूलतयाज्ञानं सर्वमेव आनन्दरूपं इत्युक्तम् ।

आश्रयादन्यतो वृत्तेः आश्रयेण समन्वयात् ।
द्रव्यत्वं च गुणत्वं च ज्ञानस्यैवोपपद्यते ।

इति यामानुचार्यस्य श्रीसूक्तिः ।

सर्वं ज्ञानं स्वत एव प्रमाणं स्वयं प्रकाशं च । अवस्थावत्त्वं द्रव्यसामान्य-लक्षणम्, संकोचविकासावस्थावत्त्वात् ज्ञानमपि द्रव्यमेव ।

चैतन्यस्यैव ज्ञानं, मतिः, प्रज्ञा, संवित्, धिषणा, धीः, मनीषा, शेमुषी, मेधा, बुद्धिः, स्मृतिः, प्रतिभा इत्यादि शब्दाः वाचकाः । प्रवृत्तिनिमित्तभेदात् वाचकानां नानात्वम् । एवं कामः, संकल्पः विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिः ह्रीः धीः भीः इत्येतत्सर्वं मन एव इति श्रुत्यनुसारात् तत्र संसारि जीवाश्रयस्य ज्ञानस्य प्रकाशे प्रसारेच मनस्सहकारित्व नियमात् मन एव इति उपचारात् उक्तम् ।

सुखादिजनकतया ज्ञानातिरेके सुखादीनां प्रमाणाभावात् ज्ञानमिति प्रसिद्धा बुद्धिरेव उपाधिभेदात् सुख दुःखेच्छा द्वेषप्रयत्नरूपा । 'इच्छामि' 'द्वेष्मि' इति व्यवहारस्य स्मरामीत्यादिवत् ज्ञानविशेषेणैव उपपत्तेः ॥

एवं प्रत्यक्षं अनुमानं आगमः स्मृतिः संशयः विपर्ययः भ्रमः विवेकः व्यवसायः मोहः रागः द्वेषः मदः मात्सर्यं अधैर्यं चापल्यं दम्थः लोभः दर्पः स्तम्भः द्रोहः अभिनिवेशः निर्वेदः आनन्दः सुमतिः दुर्मतिः सुप्रीतिः तुष्टिः उन्नतिः शान्तिः विरक्तिः रतिः मैत्री करुणा मुदिता उपेक्षा मुमुक्षा तितिक्षा लज्जा विचारणा जिगीषा क्षमा चिकीर्षा जुगुप्सा भावना कुहना असूया जिघांसा तृष्णा दुराशा वासना चर्चा श्रद्धा भक्तिः प्रपत्तिः इत्येवमादयश्च जीवगुणाः अनन्ताः धर्मभूतज्ञानस्य चैतन्यस्य अवस्थाविशेषा एव ।

आत्मपदार्थस्य चेतनत्ववत् परामात्मपदार्थस्यापि चेतनत्वात् परमात्म गुणानां ज्ञानं शक्तिः बलं ऐश्वर्यं वीर्यं तेजः सौशील्यं वात्सल्यं मार्दवमार्जवं सौहार्दं धैर्यं साम्यं कारुण्यं माधुर्यं गांभीर्यं औदार्यं स्थैर्यं पराक्रमः इत्यादयोऽपि अनन्ताः कल्याण-गुणगणाः ज्ञानशक्त्योः विततिविशेषाः ।

भक्तियोगोनाम यम - नियम - आसन - प्राणायाम - प्रत्याहार - धारण - ध्यान - समाधिरुपैः अष्टभिः अंशैःविशिष्टः तैलधारावदविच्छिन्न स्नेहपूर्वकस्मृति सन्तानरूपः । सच विवेक-विमोक - अभ्यास - क्रिया - कल्पाण - अनवसाद - अनुद्धर्जरूपेण साधन सप्तकेन जन्यः ।

विवेकः = जात्याश्रयनिमित्तादिभिरष्टैः अन्नैःकायशुद्धिः । विमोकः = कामेषु अनभिष्वङ्गः । अभ्यासः = पुनः पुनः ध्यानालम्बनस्य संशीलनम् । क्रिया = शक्यनुसारण पञ्चमहायज्ञाद्यनुष्ठानम् । कल्याणानि = सत्यम्, आर्जवं, दया, दानं, अहिंसा, ब्रह्मचर्यादीनि । अनवसादः = दैन्याभावः । अनुद्धर्षः = तुष्ट्यभावः, अतिसन्तोषश्च योगविरोधी इत्यर्थः ॥

एवं साधनसप्तकानुगृहीता भक्तिः दर्शनसमानाकारा अन्तिमप्रत्ययावधिकाच भवति । सच अन्तिम प्रत्ययः ऐतच्छरीरावसाने शरीरान्तरावसाने वा भवति । वेदनं ध्यानं उपासनं - सेवा - इत्यादिशब्दवाच्या भक्तिः परभक्ति - परज्ञान - परमभक्ति रूपक्रमवती प्रपत्त्यङ्गकाच । साद्विविधा साधनभक्तिफलभक्ति भेदात् । उक्तसाधनजन्यासाधन भक्तिः । ईश्वरादिकृपामात्रजन्यातु फलभक्तिः । प्रपत्तेः फलतया नित्यानुभाव्यतयावर्तमाना फलभक्तिरेव परांकुशनाथ - यामुन - यतिवरादिभिः सम्प्रदाये प्रवर्तिता । स्तुति नमस्कारादिषु च भक्तिशब्दप्रयोगः औपचारिकः ।

ध्यानशब्दवाच्या भक्तिः उपनिषत्प्रतिपादित विद्या भेदात् बहुविधा । सद्विद्या - दहरविद्या - भूमविद्या - शांडिल्यविद्या पुरुषविद्या - वैश्वानरविद्या - परविद्या - न्यासविद्या - इत्यादिः भेदः । तत्र न्यासविद्यैव प्रपत्तिः ।

अनन्यसाध्ये स्वाभिष्टे महाविश्वासपूर्वकम्

तदेको पायतायाश्च प्रपुत्तिःशरणागतिः ॥ इति ॥

भरतमुनिना सामान्यलक्षणं प्रपत्तेरुक्तम् ।

आनुकूल्यस्य संकल्पः प्रतिकूल्यस्य वर्जनम् ।
रक्षिष्यतीति विश्वासः गोमृत्व वरणं तथा ॥
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ॥

इति षडष्टवती प्रपत्तिः यथो योगं अनुष्ठेया ।

एतद्देहावसान एव मोक्षप्रदातृसकृत् कर्तव्या ज्ञानविशेषरूपा गुरुमुखात् रहस्य शास्त्रेषु सम्प्रदायतया वेदितव्या ।

अणुत्वेसति ज्ञानाश्रयत्वं, स्वव्यधिकरण संकल्पजन्य कृतिमत्त्वं च जीवात्मनः लक्षणम्। विभुत्वे सति चेतनत्वं परमात्मानः लक्षणम् । जीव स्वरुप - स्थिति - प्रतृत्तिभेदानां परमात्म संकल्पाधीनत्वात् परमात्मशरीरभूतस्य स्वस्य जीवात्मनः स्वान्य स्वान्तर्यामि परमात्मसंकल्पाधीन कृतिमत्वात् परमात्मानं प्रति प्रारतंत्र्यमेव स्वरूपसामान्यम्। ज्ञानाश्रयत्वं तु स्वरुप विशेषः । अणुत्वं च स्वरूपधर्मः ॥

एषोऽणुरात्मा चेतसा वेदितव्यः
बुद्धेर्गुणेनात्मगुणेन चैव हि -
आराग्रमात्रो ह्यवरोऽपि दृष्टः

अत्र बुद्धेः विभुत्वयोग्यत्वेऽपि कर्मणा संकुचितत्वात् मलरुद्धमणिप्रभावत् आश्रयतुल्यपरिमाणोपपत्तिः । आत्मनः एकशरीरस्थत्वेऽपि धर्मभूतज्ञानस्य मणि प्रभान्यायेन अनेकशरीरेषु प्रसरणोपपत्तिः । निरात्मकेषु शरीरेषु धर्मभूतज्ञानव्याप्त्यैव सुख दुःखाद्यनुभवोपपत्तिः। सुषुप्त्याद्यवस्थास्वपि शरीरधारणार्थं निरात्मक शरीरेष्विव धर्मभूतज्ञानसंयोगाभ्युपगमात् विषयतारुप विजातीय संयोगस्यैव तदानीम् अस्वीकारात् शरीरिधारणोपपत्तिः ।

धर्मभूतज्ञान संकोचविकासद्योरेव शरीरशोषणाशोषणा प्रयोजकत्वं ॥ अस्य सोम्य। महतो वृक्षस्य यदेकां शाखां जीवो जहाति अथ सा शुष्यति इति श्रुति

सिद्धम् । शाखादौ भोगावच्छेदकता प्रयोजकादृष्टनाशाधीन - धर्मभूतज्ञान विभागानुकूलव्यापारस्यैव जहात्यर्थत्वात् इदं उपपन्नम् ।

सौभरिप्रभृतीनां कायव्यूहेषु एक एव कायः जीवात्मवान् अन्ये धर्मभूतज्ञान संयोगविशेषवन्तः। परकाये प्रवेशं विनापि योगिप्रभृतीनां एवं प्रवृत्तिः उपपद्यते। परमात्मनस्तु स्वरूपव्याप्त्या संकल्पव्याप्त्या च उभयथाऽपि कायव्यूहः उपपद्यते। यथा षोडश सहस्रगोपस्त्रीणां उपयोगाय कायव्यूहःस श्रीकृष्णस्य ।

अथ : -

'विज्ञातारमरे ! केन विजानीयात्' - 'जानात्येवायम् पुरुषः' इत्यादि श्रुत्या ज्ञानाश्रयत्वस्य सिद्धिः । 'विज्ञानं यज्ञं तनुते' 'यो विज्ञानेविष्ठान्' इत्यादिना ज्ञानाश्रयपरत्वे पौनरु क्त्यापत्त्या ज्ञानस्वरूपत्वपरत्वावश्यकतया ज्ञानस्वरूपत्व-सिद्धिः ।। एवं ज्ञानस्वरूपस्य धर्मिणः जीवात्मनः ज्ञातृत्वमपि स्वरूपमिति श्रुतिसिद्धार्थात् ज्ञानं नाम चैतन्यं आत्म पदार्थस्य स्वरूपगुणः इति सिद्धम्।

वेदान्तशास्त्रे परमसायुज्यमोक्षारभ्य परमपुरुषार्थस्यैव उद्देश्यत्वात् जीवस्य चैतन्योपज्ञानपरिणामेषु भक्तिः प्रपत्तिरिति परिणामद्वयं शास्त्रीयं सांप्रदायिकं च उपायतया विधेयं अङ्गीकृतम् । अत्र उद्देश्य विधेय तदाश्रयता परमात्माधीनत्वात् परमात्मानुग्रह एव मोक्षोपायः । अनुग्रहस्य ज्ञानरुपत्वात् तदाश्रयस्य परमात्मन एव जीवमोक्षकार्ये सिद्धोपायत्वं च अङ्गीकृतम् ।।

तथाचोक्तं वादिकेसरिणा सौम्यनुमातृमुनिना तत्त्वदीपग्रन्थे : -

अयं जीवात्मा स्वयम् नित्य-निर्मल - ज्ञानाद्वैकस्वरूपः, स्वाभाविक - ज्ञातृत्व-कर्तृत्व - भोक्तृत्व -, स्वरुपधर्मः, भगवदायत्त - स्वरुप-स्थिति - प्रवृत्तिकतया तच्छरीरत्वेन तदनन्यार्हरोषत्वादिरुप स्वासाधारणाकारः, सर्व प्रकार तत्पारतंत्र्य प्रयुक्त-तद्दास्यैकरसः, तदनुजनित-निरवधिकातिशय - नित्यानन्दयोगयोग्योऽपि; गुण त्रयात्मिकया क्षणक्षणस्वभावया तमः प्रकृति + अनृत + अविद्याद्यपरनामधेयया अनाकलितमूल - सम्बन्धया मिलतैल दारुवन्हिवत् दुर्विवेचं अभिव्याप्तया

दुरत्ययभगवन्मायया तिरोहित स्वप्रकाशः, अनाद्यज्ञानान्धतया अन्यथाज्ञान - विपरीतज्ञानयुक्तः तत्कृतरागद्वेषादि दूषितः, तदुचितानि विधिनिषेध विषयाणि कर्माणि कुर्वाणः, तदनुगुणवासनावासितः, तद्बलसंवर्धित विशृङ्खल विपरीतरुचिः, तदुपचित पुण्य पापरूपाणादिकर्मसन्तानकृत - ब्रह्मादि स्तम्बपर्यन्त - सुरनरतिर्यक् - स्थावरात्मक - चतुर्विध शरीरप्रवेशविवशः, तत्तद्देहात्माभिमान जनित - अवर्जनीय तापत्रयाभिभूतः गर्भ - जन्म - बाल्य - यौवन - वार्धक - मरण - नरकादि - समस्तावस्थासु निरन्तर-वितत - विविध - निरवधिक - दुःखपरिपूर्णो वर्तते ॥

एवं परस्पर-कार्यकारणभूताविद्या - कर्म - वासना - रुचिप्रकृतिसम्बन्धरुप संसारचक्रमापन्न अनवधिक दुःखजालव्याकुलं आत्मानं अवलोक्य; परमकारुणिको भगवान् अपरिमितसौहार्दस्वभावत्वात् अव्याजरूपां कृपांतनोति ॥ इति ॥

तेषामेवानुकम्पार्थं अहं अज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥
तेषाम् सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन माम् उपयान्ति ते ॥

इति च भगवता जगद्गुरुणा श्रीकृष्णेन परमात्मनैव गीतम् ।

एवं करुणारूपं परमात्मचैतन्यं परमशक्तिरुपं जीवचैतन्यं च विशिष्टाद्वैतनाम्ना संकेतिते परमवैदिक सिद्धान्तनाम्नि वेदान्तशास्त्रे धर्मार्थकाममोक्षाख्य पुरुषार्थ चतुष्टयस्यापि साधकं इति शम् ।